**209** **B**

Total No. of Questions—**16**

Total No. of Printed Pages—**4** **Regd. No.** | | | | | | | | | | |

**Part II**

# SANSKRIT, Paper - II

**(Second Language)**

***Time : 3 Hours]*** ***[Max. Marks : 100***

**Note :—** (1) *ALL* questions should be attempted.

(2) Question Nos. **1, 2** and **3** should be answered either in the medium of instruction of the candidate or in Sanskrit (Devanagari Script) only.

(3) The remaining questions should be answered in Sanskrit (Devanagari Script) only.

**सूचना :—** (1) **सर्वे** प्रश्ना: समाधातव्या:।

(2-3) प्रथम, द्वितीय, तृतीय प्रश्नान् विहाय अन्ये सर्वेऽपि प्रश्ना: संस्कृतभाषायामेव समाधातव्या:।

**1.** **एक**स्य श्लोकस्य प्रतिपदार्थं भावं च लिखत— 1×8=8

(अ) कुर्वीत सङ्गतं सद्भिर्नासद्भिर्गुणवर्जितै:।
प्राप राघव सङ्गत्या प्राज्यं राज्यं विभीषण:॥

**अथवा**

(आ) दानं धर्मश्च विद्या च रूपं शीलं कुलं तथा ।
सुखमायुर्यशश्चैव नवगोप्यानि यत्नत: ॥

**2.** **एकं** निबन्धप्रश्नं समाधत्त— 1×6=6

(अ) गङ्गावतरणे रतस्य भगीरथस्य प्रयत्नं संग्रहेण लिखत ।

**अथवा**

(आ) हरिश्चन्द्र: सत्यमेव जयते इति कथं निरूपितवान् ?

**3.** **एकं** निबन्धप्रश्नं समाधत्त— 1×6=6

(अ) बाणभट्ट: अनाथपरिपालनकथां कथं वर्णितवान् ?

**अथवा**

(आ) दधीचि: दानवीर: कथम् अभवत् ?

**4.** **त्रयाणां** प्रश्नानां समाधानानि लिखत– 3×2=6

(अ) आश्रमपदे रामः सीता लक्ष्मणः च कथं स्थिताः ?

(आ) भरतः कीदृशं रामं द्रष्टुमैच्छत् ?

(इ) वासुकिना गरुत्मान् किमिति अभिहितः ?

(ई) गरुडेन कः त्वमिति पृष्टः जीमूतवाहनः किमवदत् ?

(उ) पितृसद्मगोचरः अपि शिवः कीदृशः ?

(ऊ) चिताभस्मनः रजः अपि केन विशुद्धिमश्नुते ?

**5.** **द्वयोः** ससन्दर्भं व्याख्यानं लिखत– 2×3=6

(अ) मनोरथो महानेषः भगीरथ ! महारथ ?

(आ) भविता ते न कदापि सत्वसादः।

(इ) अवदत् माङ्गलिकं गलेऽस्ति ते ।

(ई) ननु भोः मातुः, शिशुं मा भिदः ।

**6.** **द्वयोः** ससन्दर्भं व्याख्यानं लिखत- 2×3=6

(अ) अनाथपरिपालनं हि धर्मः अस्मद्विधानाम् ।

(आ) भवन्तमभिषेक्तुम् आगतं मया ।

(इ) मनः एव मनुष्याणां कारणं बन्धमोक्षयोः।

(ई) कथं च वयं तदस्थीनि प्राप्नुयाम ?

**7.** **त्रयाणां** प्रश्नानां समाधानानि लिखत– 3×2=6

(अ) तपसि तिष्ठतः भगीरथस्य कति वर्षाणि अतीतानि ?

(आ) अगस्त्यः कम्परायाय किमर्थं खड्गं प्रेषयति ?

(इ) जन्मावधि किं न कुर्यात् ?

(ई) किं त्यागेनैव उपलभ्यते ?

(उ) चन्द्रमत्याः हरिश्चन्द्रस्य स्मृतिः कस्मात् आगता ?

(ऊ) भक्तः किमर्थं पुष्पवनम् अगच्छत् ?

**8.** **त्रयाणां** प्रश्नानां समाधानानि लिखत– 3×2=6

(अ) शूद्रकस्य राजधानी का ?

(आ) गोपाः इन्द्रस्य पूजां त्यक्त्वा कस्य पूजां कृतवन्तः ?

(इ) वीरः कः ? सः किमर्थं भूमण्डले निवसति ?

(ई) कदा नरेन्द्रस्य विस्मयः द्विगुणः अजायत ?

(उ) चूडाला स्वपतिदेवं किमिति अवदत् ?

(ऊ) त्रिशिराः त्रिभिः शिरोभिः किं किं अकरोत् ?

9. **एकेन** वाक्येन समाधानं दत्त– 5×1=5

(अ) भगीरथः कुत्र तपः आतिष्ठत् ?

(आ) मधुराविजयस्य कर्त्री का ?

(इ) शिशुपालस्य शिरः केन छिन्नम् ?

(ई) शूरं केन भेदयेत् ?

(उ) कस्य पूजा विफला भवति ?

10. **एकेन** वाक्येन समाधानं दत्त– 5×1=5

(अ) गोविन्दपट्टाभिषेकः कस्मात् ग्रन्थात् स्वीकृतः ?

(आ) परनारीसहोदरः कः ?

(इ) नरेन्द्रः केन नाम्ना लोकविख्यातः अभवत् ?

(ई) उज्जयिन्याः राजा कः ?

(उ) दधीचिः स्वशरीरं कथम् अत्यजत ?

11. अधोनिर्दिष्टकथां पठित्वा प्रश्नानां समाधानानि दत्त– 5×1=5

अङ्गदेशे लोमपादो नाम राजा बभूव । तस्य जनपदे कदाचित् महती अनावृष्टिः सञ्जाता । तेन बहूनां प्राणिनाम् उच्छेदः समभवत् । अथ सः राजा वेदपारगैः विप्रैः वरुणम् आराधयामास । अथापि वृष्टिः नास्ति ।

अनन्तर चिन्ताकुलः भूपालः भूसुरान् आहूय पप्रच्छ । केन उपायेन वृष्टिः स्यात् ? इति । ते च एवं प्रोचुः ।

महाराजः अस्ति विभण्डको नाम महर्षिः वनस्थः । तस्य च ऋष्यशृङ्गः नाम तनयः । सः महात्मा यथा जातः अनाघ्रातविषयगन्धः न जानपदान् वृत्तान्तान् जानाति । पितेव ब्रह्मनिष्ठः पितृशुश्रूषापरश्च । सः यद्यानीयते जनपदं तदवश्यं वृष्टिः भविष्यति । परन्तु पितुः सकाशात् तदानयनं दुष्करं मन्यामहे इति ।

**प्रश्नाः**—

(अ) लोमपादस्य जनपदे कदाचित् का सञ्जाता ?

(आ) राजा वेदपारगैः कम् आराधयामास ?

(इ) भूपालः भूसुरान् आहूय किमिति पप्रच्छ ?

(ई) वनस्थः महर्षिः कः ?

(उ) ऋष्यशृङ्गः कान् न जानाति ?

12. नामनिर्देशपूर्वकं **त्रीणि** सन्धत्त– 3×2=6

(अ) रामस् + शेते

(आ) चक्रिन् + ढौकसे

(इ) सुप् + अन्तम्

(ई) षट् + मुखः

(उ) तपः + वनम्

(ऊ) वृक्षः + फलति ।

13. नामनिर्देशपूर्वकं **त्रीणि** विघटयत 3×2=6

(अ) नमस्ते

(आ) वाङ्महिमा

(इ) अरीञ्जयति

(ई) वाग्वादः

(उ) तट्टीका

(ऊ) गुरुर्जयति ।

14. **द्वौ** शब्दौ अन्तलिङ्गविभक्तिवचननिर्देशपूर्वकं सम्पूर्णतया लिखत– 2×6=12

(अ) जलमुक्

(आ) सम्पत्

(इ) मनस्

(ई) एतद् (स्त्रीलिङ्ग) ।

15. समासनामनिर्देशपूर्वकं **त्रयाणां** विग्रहवाक्यानि लिखत– 3×2=6

(अ) पार्वतीपरमेश्वरौ

(आ) चक्रपाणिः

(इ) पुरुषसिंहः

(ई) अधर्मः

(उ) उपकृष्णम्

(ऊ) त्रिभुवनम् ?

16. रेखाङ्कितपदं शुद्धीकृत्य शुद्धं वाक्यं लिखत– 5×1=5

(अ) <u>छात्रः</u> गुरुं नमस्कुर्वन्ति ।

(आ) <u>बालिकाः</u> सम्यक् गायति ।

(इ) <u>सः</u> विद्यालये अपठताम् ।

(ई) <u>अहं</u> पाठान् पठावः ।

(उ) <u>एतौ</u> अधुना चलनचित्रं पश्यति ।